**दुर्वर्त्तु** त्रि॰ दुर्+वृ—कर्म्मणि तुन् । दुर्वारे "दुर्वर्त्तुःस्मा भवति भीम ऋञ्जन्" ऋ॰ ४।३८।८ "दुर्वर्त्तुः दुर्वारः" भा॰ ।

**दुर्वस** त्रि॰ दुःखेनोष्यतेऽत्र दुर्+वस—बा॰ आधारे खल् । कष्टेन वासयोग्ये वस्तुमशक्ये "त्रयोदशोऽयं संप्राप्तः कष्टात् परमदुर्वसः" भा॰वि॰१अ॰ ।

**दुर्वसति** स्त्री दुःखेन वसतिः । दुःखेनावस्थितौ "रोगोपसृष्टतनुदुर्वसतिं मुमुक्षुः" रघुः ।

**दुर्वह** त्रि॰ दुःखेनोह्यतेऽसौ दुर्+वह—कर्म्मणि खल् । दुःखेन वहनीये वोढुमशक्ये । "न दुर्वहश्रोणिपयोधरार्त्ताः" कुमा॰ "अनुप्रवेशादाद्यस्य पुंसस्तेनापि दुर्वहम्" रघुः । "दुर्वहो निग्रहो दण्डो हिरण्यबहुलस्तथा" भा॰शा॰ ६१९०श्लो॰ ।

**दुर्वाच्** स्त्री गर्हिता वाक् प्रा॰स॰ । १निन्द्ये वाक्ये दुःस्थिता वागस्य प्रा॰ब॰। २निन्द्यवचनान्विते त्रि॰ "शय्यासनमलङ्कारमन्नपानमनार्यताम् । दुर्वाग्भरं रतिञ्चैव ददौ स्त्रीभ्यः प्रजापतिः" भा॰अनु॰४॰अ॰ "अतीव जल्पन् दुर्वाचो भवतीह विहेठकः" भा॰आ॰ ३०७६ श्लो॰ ।

**दुर्वाच्य** न॰ निन्द्यं वाच्यम् प्रा॰स॰। अपवादे १अकीर्त्तौ "क्रोडानिमित्तं न श्रुत्वा दुर्वाच्यं न भविष्यति" रामा॰सु॰ १५२४श्लो॰। २कष्टेन वाच्ये च ।

**दुर्वाद** पु॰ दुष्टो वादः प्रा॰स॰। अकीर्त्तौ स्तुतिपूर्वकाप्रियवाक्ये १अपवादे जटाध॰ २निन्दितवाक्ये च ।

**दुर्वान्त** न॰ दुष्टं वान्तं प्रा॰स॰ । १विधानातिक्रमेण वमने दुःस्थितं वान्तमस्य प्रा॰ब॰। २दुष्टवमनयुक्ते त्रि॰ । "दुर्वान्तस्य तु सन्तत् क्लिष्टा दोषा व्याप्य शरीरं कण्डूश्वयथुकुष्ठपीडकाज्वराङ्गमर्दनिस्तोदनानि कुर्वन्ति" सुश्रुतः ।

**दुर्वार** त्रि॰ दुःखेन वार्य्यतेऽसौ दुर्+वारि—कर्मणि खल् । दुःखेन वारणीये वारयितुमशक्ये "किञ्चायमरिदुर्वारः पाणौ पाशः प्रचेतसः" कुमा॰ "सा दुर्वारं कथमपि परित्यागदुःखं विषेहे" रघुः ।

**दुर्वारण** त्रि॰ दुःखेन वारणमस्य । १दुःखेन वारणीये "संरब्धस्य शरानस्यन् द्रोणं दुर्वारणं रणे" भा॰द्रो॰ १९२अ॰। २शिवे पु॰ दुर्विषहशब्दे दृश्यम् ।

**दुर्वारि** त्रि॰ दुःखेन वारिर्वारणमस्य । कम्बोजदेशीये योधभेदे "एते दुर्वारयो नाम कम्बोजा यदि ते श्रुताः" भा॰द्रो॰११२अ॰ ।

**दुर्वार्त्ता** स्त्री गर्ह्या वार्त्ता प्रा॰स॰ । अप्रियावेदकवार्त्तायां [दुष्प्रवृत्तौ ।

**दुर्वासना** स्त्री दुष्टा वासना प्रा॰स॰। पूरयितुमशक्येच्छायाम्

**दुर्वासस्** पु॰ मुनिभेदे स च शङ्करांशेनात्रेरनसूयागर्भजः । तदुद्भवकथा आत्रेयशब्दे ६९२ पृ॰दृश्या तन्नामनिरुक्तिश्च यथा "निगूढनिश्चयं धर्मे यं तं दुर्वाससं विदुः" भा॰ अनु॰ ४७अ॰ । "ममांशस्तु क्षितितले महाभागो द्विजोत्तमः । दुर्वासा इति विख्यातः स हि त्वां याजयिष्यति" भा॰आ॰ २२३अ॰ शिववाक्यम् । तस्य रुद्रांशजत्वेन क्रोधनत्वं यथाह "दुर्वासाः क्रोधनः श्येनस्तथा दीर्घतमा मुनिः" भा॰स॰ ७अ॰ "शिष्यायुतसमोपेतो दुर्वासा नाम कामतः । तमागतमभिप्रेक्ष्य मुनिं परमकोपनम्" भा॰व॰२६१अ॰ तस्य क्रोधशीलत्वेन विशेषणम् । दुःसाध्यं वासः गृहे वासनमस्य इति वा व्युत्पत्तिः । गृहे तदीयवासनस्य दुःसाध्यत्वात् दुर्वासस्त्वं यथोक्तं भा॰अनु॰१५९अ॰ यथा "अवसन्मे गृहे तात ! ब्राह्मणो हरिपिङ्गलः । चीरवासा बिल्वदण्डो दीर्घश्मश्रुः कृशो महान् । दीर्घेभ्यश्च मनुष्येभ्यः प्रमाणादधिको भुवि । सर्वान् सञ्चरते लोकान् ये दिव्या ये च मानुषाः । इमां गाथां गायमानश्चत्वरेषु सभासु च । दुर्वाससं वासयेत् को ब्राह्मणं सत्कृतं गृहे । रोषणः सर्वभूतानां सूक्ष्मेऽप्यपकृते कृते । परिभाषाञ्च मे श्रुत्वा कोऽनुदद्यात् प्रतिश्रयम् । यो मां कश्चिद्वासयीत न स मां कोपयेदिति । यस्मान्नाद्रियते कश्चित्ततोऽहं समवासयम् । स स्म भुङ्क्ते सहस्राणां बहूनामन्नमेकदा । एकदाश्माल्पकं भुङ्क्ते न चैवेति पुनर्गृहान् । अकस्माच्च प्रहसति तथाऽकस्मात् प्ररोदिति । न चास्य वयसा तुल्यः पृथिव्यामभवत्तदा । अथ स्वावसथं गत्वा स शय्यास्तरणानि च । कन्याश्चालङ्कृता दग्ध्वा ततो व्यपगतः पुनः । अथ मामब्रवीद्भूयः स मुनिः संशितव्रतः । कृष्ण ! पायसमिच्छामि भोक्तुमित्येव सत्वरः । तदैव तु मया तस्य चित्तज्ञेन गृहे जनः । सर्वाण्यन्नानि पानानि भक्ष्याश्चोच्चावचास्तथा । भवन्तु सत्कृतानीह पूर्वमेव प्रचोदितः । ततोऽहं ज्वलमानं वै पायसं प्रत्यवेदयम् । तं भुक्त्वैव तु स क्षिप्रं ततो वचनमब्रवीत् । क्षिप्रमङ्गानि लिम्पस्व पायसेनेति स स्म ह । अविमृश्यैव च ततः कृतवानस्मि तत्तथा । तेनोच्छिष्टेन गात्राणि शिरश्चैवाभ्यमृक्षयम् । स ददर्श तदाभ्यासे मातरन्ते शुभाननाम् । तामपि स्मयमानः स पायसेनाभ्यलेपयेत् । मुनिः पायसदिग्धाङ्गीं रथे तूर्णमयोजयत् । तमारुह्य रथञ्चैव निर्ययौ च गृहान्-